# निरुक्तशास्त्रस्य सामान्यपरिचयः

अनिरुद्धः वन्द्योपाध्यायः*

## भूमिका

षड्सु वेदाङ्गेषु अन्यतमं निरुक्तं पदं कुरुते। ऋषिणा यास्केन रचितं निरुक्तम् इदम्। निरुच्यते निश्शेषेण उपदिश्यते तत्तदर्थानाम् अवबोधनाय पदजातं यत्र तद् निरुक्तम् इति कथ्यते। निरुक्तस्य भागत्रयं वर्तते, यथा- नैघण्टुककाव्यम्, नैगमकाण्डम्, दैवतकाण्डम् इति। तथाहि अनुक्रमणिकाभाष्ये उच्यते-

आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा।
तृतीयं दैवतञ्चेति समाम्नायस्त्रिधा स्थितः॥ इति।

अतः निरुक्तस्य त्रीणि काण्डानि इति उच्यते। प्रत्येकस्मिन् काण्डे अध्यायाः वर्तन्ते। नैघण्टुकाण्डे पञ्च अध्यायाः, नैगमकाण्डे षट् अध्यायाः, दैवतकाण्डे षट् अध्यायाः च वर्तन्ते। आहत्य निरुक्ते सप्तदश अध्यायाः विद्यन्ते।

## नैघण्टुक-काण्डम्

प्रथमतः पञ्चाध्यायात्मकं वर्तते नैघण्टुक-काण्डम्। शब्दार्थकाण्डम् इति तस्य नामान्तरम्। पर्यायवाचिशब्दाः काण्डे अस्मिन् वर्तन्ते।

अर्थावबोधे निरपेक्षतया पदजातं यत्र उक्तं तद् निरुक्तम् इति। अन्यत् च, एकैकस्य पदस्य सम्भाविता अवयवार्थाः यत्र निश्शेषेण उच्यन्ते तदपि निरुक्तम् इति। अमरकोषग्रन्थे, वैजयन्तीग्रन्थे, हलायुधग्रन्थे एवं प्रकारेण निघण्टुशब्दः व्याख्यातः। निघण्टौ प्रथमकाण्डे पर्यायवाचिशब्दाः सन्ति। पृथिव्याः एकविंशतिः पर्यायाः भवन्ति। यधा- गौः, ग्मा, ज्मा, क्ष्मा, क्षा, क्षमा, क्षोणी, क्षितिः, अवनिः, उर्वी, पृथ्वी, मही, रिपः, अदितिः, इला, निर्ऋतिः, भूः, भूमिः, पूषा, गातुः, गोत्रा चेति। एवं सुवर्णस्य पञ्चदश, अन्तरिक्षस्य षोडश, रात्रेः त्रयोविंशतिः, दिवसस्य द्वादश, उषःकालस्य षोडश पर्यायाः भवन्ति। विशेष्यपदवत् क्रियापदानाम् अपि पर्यायाः उल्लिखिताः। यथा- गमॢ गतौ इति धातोः १२२ पर्यायाः भवन्ति। निघण्टोः चतुर्थे पञ्चमे च अध्याये वैदिकशब्दाः प्राप्यन्ते।

किंवदन्तीनये निघण्टोः निरुक्तस्य च व्याख्याता यास्काचार्यः इति। अपि च तद् उभयं निरुक्तम् इति नाम्ना अभिधीयते। किन्तु स्कोल्ड्, डॉ लक्षणस्वरूपः इत्येतेषां मते, नैगमकाण्डस्य दैवतकाण्डस्य च व्याख्याता यास्कः। तदेव यास्केन नैघण्टुककाण्डारम्भे उक्तम्- ‘समाम्नायः समाम्नातः स व्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इत्याचक्षते’ इति। यास्कात् पूर्वं पञ्चाध्यायात्मकः निघण्टुः अन्येन ऋषिणा रचितः। एतस्य व्याख्यानस्य नाम निरुक्तं, यत्

* स्नातकोत्तरच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

यास्केन विरचितम्। अयं निघण्टुः वर्तते अमरकोषः, वैजयन्ती, हलायुधः, मेदिनीकोषः चेति कोषग्रन्थानां मूलम्। नैघण्टुक-काण्डे यास्केन नाम, आख्यातं, निपातः, शब्दनित्यत्वं चेति व्याकरणविचाराः आलोचिताः सन्ति।

## नैगमकाण्डम्

निगमः इत्युक्ते वेदः। बहुत्र यास्काचार्येण वेदः इत्यस्मिन् अर्थे निगमशब्दः उक्तः। यथा इत्यपि निगमः भवति इति। अतः वेदे विद्यमानाः शब्दाः नैगमकाण्डे प्राप्यन्ते। तेषां व्युत्पत्तिः-अर्थः, दृष्टान्तः, मन्त्राः चेति व्याख्याताः। यास्काचार्यः शब्दप्रयोगकाले वेदमन्त्राणां निरूपणम्, अपि च मन्त्रे विद्यमानानां सर्वेषां शब्दानां व्याख्यानम् अकरोत्। यथा, जहा इति। तस्यार्थः जघान इत्युक्ते हतवान् इति। प्रसङ्गे अस्मिन् नैगमकाण्डस्य प्रथमाध्याये वेदमन्त्रः उक्तः-

को नु मर्या अमिथितः सखा सखायमब्रवीत्। जहा को अस्मदीषते॥ इति।

तत्र मर्या, अमिथितः, ईषते इति समेषां व्याख्यानं प्रसङ्गे अस्मिन् कृतम्।

## दैवतकाण्डम्

निरुक्तस्य तृतीयकाण्डं दैवतकाण्डम् इति पदेन व्यपदिश्यते। काण्डे अस्मिन् यास्काचार्यः देवतातत्त्वस्य निरूपणं कृतवान्। भूलोकः अन्तरीक्षलोकः, द्युलोकभेदेन देवतायाः लक्षणकार्यस्वरूपस्थानरूपाणि प्राप्यन्ते। अस्य काण्डस्य पठनेन वैदिकयुगे स्थितानाम् ऋषीणां विषये जायते। अग्निदेवः पृथिव्यां वर्तते, सः च अस्माकं सामीप्यदेवः। दूरदेशस्थानीयत्वेन सूर्यः द्युलोके विराजते। अग्निसूर्ययोः मध्ये एव सर्वे देवाः विराजन्ते भूलोकस्य प्रधानदेवता अग्निः, अन्तरीक्षलोकस्य वायुः इन्द्रश्च, द्युलोकस्य सूर्यः आदित्यः वा। एते देवाः परमात्मनः अंशाः, न तु स्वतन्त्राः। यास्केन प्रोक्तम्- देवतायाः एक आत्मा बहुधा स्तूयते, एकस्य आत्मनः अन्ये देवाः प्रत्यङ्गानि भवन्ति इति। मन्त्रविशेषे देवताः कदाचित् सगुणाः, कुत्रचित् निर्गुणाः अपि प्राप्यन्ते।

वेदोक्तदेवाः प्रकृतेः प्रपञ्चमात्रम्। यथा वातप्रकोपस्य देवता मरुत्, वज्रस्य देवता रुद्रः, दिवाकालिनः सूर्यः मित्रः, पुनश्च रात्रिकालिनः सूर्यः वरुणः चेति वर्तते। नैके पण्डिताः एतादृशं व्याख्यातं नाङ्गीकुर्वन्ति। परन्तु द्विसहस्रवर्षपूर्वात्मककाले यास्काचार्येण वैदिकदेवतायाः विवरणं व्याख्यातम्। दैवतकाण्डे वृत्रासुरहननविषये उक्तं यत्-

'तत् को वृत्रः? मेघः इति नैरुक्ताः। त्वाष्ट्रोऽसुर इति ऐतिहासिकाः। अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते। तत्रोपमार्थेन युद्धवर्णा भवन्ति' इति। एवम् इन्द्रेण वृत्रासुरः हतः इति रूपकालङ्कारेण वर्णितम्।

विज्ञानविषयाः अपि निरुक्ते प्राप्यन्ते। अन्तरीक्षलोकस्य अग्निः पार्थिवाग्निः चेति द्वयोः अग्न्योः मध्ये भेददर्शनार्थं यास्कः आह, उदकेन्धनः शरीरोपशमनः इति विद्युत् अग्निः। उदकोपशमनः शरीरदीप्तिः इति पार्थिवाग्निः। Convex lense इत्यस्य वर्णनम् अपि दैवतकाण्डे अग्निस्वरूपविषये प्राप्यते। तादृशे मणौ तीक्ष्णीकृत-सूर्यरश्मेः प्रभावेण गोमयादौ रश्मिः पतति चेत् तत् प्रज्वलितं दृश्यते। अर्थात् तदानीन्तनकालस्य सौरविज्ञानस्य अपि वर्णनं प्राप्यते। सूर्यचन्द्रयोः विषये उक्तं यत्- अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते...आदित्योऽस्य

दीप्तिर्भवति इति। एवंरूपेण वर्णनं निरुक्ते दृश्यते।

### निघण्टुव्याख्याकाराः

सम्प्रति निघण्टुग्रन्थस्य एका एव व्याख्या समुपलब्धा वर्तते। अस्याः व्याख्यायाः रचयिता वर्तते देवराजयज्वा इति। यज्ञेश्वरः इति तस्य पिता वर्तते। अयं दक्षिणभारतस्य निवासी आसीत्। तस्य समयकालविषये मतद्वयं प्राप्यते। केषाञ्चिद् विदुषां नये अयं सायणात् परवर्ती आसीत्। परन्तु यथार्थतः सायणात् पूर्ववर्ती एव अयम् आसीत्। आचार्यसायणेन ऋग्वेदस्य स्वकीये भाष्ये निघण्टुभाष्यवचनस्य उल्लेखः कृतः। देवराजयज्वा स्वभाष्यस्य उपोद्घाते क्षीरस्वामिनः तथा अनन्ताचार्यस्य निघण्टुव्याख्यायाः उल्लेखं कृतवान्। यथा- इदं च...क्षीरस्वामी अनन्ताचार्यकृतां निघण्टुव्याख्यां...निरीक्ष्य क्रियते। क्षीरस्वामी अमरकोशस्य प्रसिद्धः टीकाकारः अस्ति। स्वप्रतिज्ञानुसारेण देवराजयज्वा नैघण्टुककाण्डस्य एव निर्वचनम् आधिक्येन विस्तरेण कृतवान्। अन्यकाण्डानां व्याख्या अल्पा वर्तते। सायणात् पूर्ववर्तित्वेन अस्याः व्याख्यायाः तथा निरुक्ते च विशिष्टं महत्त्वम् अस्ति।

### स्वरूपम्

वैदिककोषस्य भाष्यरूपम् अस्ति निरुक्ताख्यं वेदाङ्गम्। निघण्टौ तु केवलं वैदिकाः शब्दाः परिगणिताः सन्ति। परन्तु निरुक्तकारः यास्कः तेषां वैदिकानां शब्दानां सविस्तरं विवेचनं कृतवान्। अर्थात् निरुक्ते वैदिकशब्दानाम् अर्थज्ञानस्य प्रक्रिया वर्णिता अस्ति। निघण्टोः पञ्चाध्यायानां विवेचनं स्वकीये निरुक्तग्रन्थे यास्केन द्वादशाध्यायेषु सम्पादितम् अस्ति। निरुक्तं गद्यशैल्यां निबद्धम् अस्ति, किन्तु अन्ये वेदाङ्गग्रन्थाः सूत्रशैल्यां निबद्धाः सन्ति।

### कालः

निघण्टुकालानन्तरं निरुक्तानां समयः प्रारब्धः भवति। दुर्गाचार्यानुसारेण निरुक्तं चतुर्दशसङ्ख्यकम् आसीत्।

### निरुक्तकाराः

यास्कस्य उपलब्धे निरुक्ते द्वादशनिरुक्तकर्तॄणां नामानि मतानि च निर्दिष्टानि सन्ति। बृहस्पतिः, काश्यपः, औपमन्यवः, औदुम्बरायणः, वार्ष्यायणिः, गार्ग्यः, शाकपूणिः, गालवः, कौत्सव्यः, यास्कः इत्यादयः सन्ति निरुक्तकाराः। इदानीन्तनकाले उपलभ्यते केवलं यास्कप्रणीतं निरुक्तम्।

### प्रयोजनम्

व्याकरणशास्त्रं निरुक्तस्य अध्ययनेनैव परिपूर्यते। अतः व्याकरणस्य कार्त्स्न्यं निरुक्तस्य एकं प्रयोजनम्। यास्केन निरुक्तस्य प्रयोजनम् उक्तम्। इदम् अन्तरेण मन्त्रेषु अर्थप्रत्ययः न विद्यते। अस्य शास्त्रस्य अध्ययनं विना वेदमन्त्राणाम् अर्थज्ञानं न सम्भवति। यतो हि, शास्त्रे अस्मिन् वैदिकशब्दानां विवरणम् उपदिष्टम्। अपि च वेदार्थेन एव वयं सफलाः भवेम इति उच्यते निरुक्तशास्त्रे।



*dīpaśikhā*/v7/2024/Aniruddha Bandyopadhyay/pp. 19-21